संक्षेपान्न च विस्तारात्तस्या दानफलं महत् ॥
श्रीताड़ीपत्रजे सर्षे समे पत्रसुसञ्चिते ।
विचित्रकं विपार्श्वे च चर्म्मणा सवटोलती ॥
रक्तेन त्वथ कृष्णेन मुद्रांनावर्द्धितेन च ।
दृढ़सूत्रसुबन्धेन एवंविधकृतेन च ॥
यस्तु शास्त्रप्रसादर्थी संहितानुपलेखयेत् ।
ददाति चाभियुक्ताय स याति परमां गतिम् ॥
पूर्व्वोत्तरप्लवे देशे सर्व्वबाधाविवर्ज्जिते ।
गोमयेन शुभेनैव कुर्य्यान्मण्डलकं बुधः ॥
चतुर्हस्तप्रमाणेन शुभञ्च चतुरस्रकम् ।
तस्य मध्ये लिखेत् पद्मं सितरक्तरजादिभिः ॥
सर्व्वर्त्तुकमयैः पुष्पैर्भूषयेत् सर्व्वतो दिशम् ।
वितानं दापयेन्मूर्द्ध्नि शुभचित्रविचित्रितम् ।
पार्श्वतः सितवस्त्रैस्तु सम्यक् शोभां प्रकल्पयेत् ।
कन्दुकैरर्द्धचन्द्रैश्च दर्पणैश्चामरैस्तथा ॥
घण्टाकिङ्किणिशब्दैश्च सर्व्वत्र उपकल्पयेत् ।
तस्य मध्ये न्यसेद्यन्त्रं नागदन्तमयं शुभम् ॥
अधः कश्चिन्निबद्धन्तु पार्श्वतो हरिदन्तिभिः ।
शोभितं दृढ़बन्धेन बद्धं यत्नेन बुद्धिमान् ॥
तस्योर्द्ध्वे विन्यसेद्देव्याः पुस्तकं लिखितं शुभम् ।
आलेख्यमपि तत्रैव पूजयेद्विधिना ततः ॥
सिन्दूरकैस्तथा पुष्पैः कृमिकीटविवर्ज्जितैः ।
चन्दनेन सदा तत्र भक्त्या चाथ धूपयेत् ॥
धूपञ्च गुग्गुलुं देयं तुरुष्कागुरुमिश्रितम् ।
दीपमालां तथा चाग्रे नैवेद्यं विविधं पुनः ॥
खाद्यं पेयान्वितं लेह्यं चोष्यञ्चापि निवेदयेत् ।
पूजयेद्दिक्पालांस्तु लोकपालान् यथाक्रमम् ॥
कन्याः स्त्रियस्तु संपूज्या मातरः कल्पयेच्च ताः ।
पुस्तकं देवदेवीञ्च विप्राणां दक्षिणां तथा ॥
स्वशक्त्या चैव दातव्या नृपं पौरांश्च पूजयेत् ।
तथा संपूजयेद्वत्स लेखकं धर्म्मभागकम् ॥
छन्दोलक्षणतत्त्वज्ञं सत्कविं मधुरस्वरम् ।
प्रणष्टं स्मरते यस्तं श्रेष्ठं पुस्तकलेखकम् ॥
नातिसन्ततविच्छिन्नैर्न स्थूलैर्न च कर्कशैः ।
नन्दिनागरकैर्व्वर्णैर्लेखयेच्छिवपुस्तकम् ॥
प्रारम्भे पञ्चश्लोकानि पुनः शान्तिन्तु कारयेत् ।
रात्रौ जागरणं कुर्य्यात् सर्व्वापेक्षं प्रकल्पयेत् ॥
नटचारणनर्म्मैश्च देयाः कथनसम्भवैः ।
प्रत्यूषे पूजयेल्लोकांस्ततः सर्व्वं विसर्ज्जयेत् ॥
एकान्ते सुमनस्केन विश्रब्धेन दिने दिने ।
निष्पाद्यं विधिनानेन स्वर्क्षे च शुभवासरे ॥
ततः पूर्व्वोक्तविधिना पुनः पूजां प्रकल्पयेत् ।
तथा विद्याविमानन्तु सप्तपञ्चत्रिभूमिकम् ॥
विचित्रवस्त्रशोभाढ्यं शुभलक्षणलक्षितम् ।
कारयेत् सर्व्वतोभद्रं किङ्किणीवरकान्वितम् ।
दर्पणैरर्द्धचन्द्रैश्च घण्टाचामरमण्डितम् ।
तस्मिन्धूपं समुत्क्षिप्य सुगन्धं चन्दनागुरुम् ॥
तुरुष्कं गुग्गुलुं वत्स शर्करामधुमिश्रितम् ।
पूर्व्ववत् पूजयेत् सर्व्वान् कन्यास्त्रीद्विजपौरवान् ॥
तथा तं पुस्तकं वत्स विन्यसेद्विधिपूजितम् ।
एवं कृत्वा तथा चिन्त्या मातरः प्रीयतां मम ॥
यस्यैव मुख्यं तच्छास्त्रं पुस्तं पुरि विकल्पयेत् ।

तथा तपस्विनः पूज्याः सर्व्वशास्त्रार्थपारगाः ॥
शिवव्रतधरा मुख्या विष्णुधर्म्मपरायणाः ।
महता जनसंघेन रथस्थं वाद्यवादनैः ॥
प्रधानैश्चापि तन्नेयं यत्र देवस्य चायतनम् ।
सामान्यं शिवतीर्थेषु मातरो भवनेषु च ॥
तस्मिन् पूजां तथा कृत्वा देवदेवेन शूलिना ।
समर्पयेत् प्रयत्नेन मातरः प्रीयतां मम ॥
सदाध्ययनयुक्ताय विद्यादानरताय च ।
विद्यासंग्रहयुक्ताय सर्व्वशास्त्रकृताश्रमे ॥
तेनैव वर्त्तते यस्तु तस्य तं विनिवेदयेत् ।
जगद्धिताय वै शान्तिं सर्व्वार्थां वाचयेत्तथा ॥
तेन तोयेन दातारं मूर्द्ध्नि समभिषिञ्चयेत् ।
वरमेतु ततः शब्दमुच्चार्य्य जगतस्तथा ॥
एवं कृते महाशान्तिर्देशस्य नगरस्य च ।
अनेन विधिना यस्तु सर्व्वबाधाः शमन्ति च ॥
अनेन विधिना यस्तु विद्यादानं प्रयच्छति ।
स भवेत् सर्व्वलोकानां दर्शनादघनाशनः ।
मृतोऽपि गच्छते स्थानं ब्रह्मविष्णुनमस्कृतम् ॥
सप्त पूर्व्वांपरान् वंशानात्मनः सर्व्व एव च ।
उद्धृत्य पापकलिलाद्विष्णुलोके महीयते ॥
यावत् तत्पत्रसंख्यानमक्षराणि विधीयते ।
तावत् स विष्णुलोकेषु क्रीड़ते विविधैः सुखैः ॥
तदा क्षितिं समायातो देव्या भक्तिरतो भवेत् ।
समस्तभोगसम्पन्ने विद्वान् संजायते कुले ॥
विद्यादानप्रभावेन योगशास्त्रं ददेद्यदि ।
आत्मवित्तानुरूपेण यः प्रयच्छति मानवः ।
अशाठ्यात् फलमाप्नोति सत्यं सत्यं न संशयः ॥
स्त्रिया वानेन विधिना विद्यादानफलं लभेत् ।
भर्त्तुर्व्वानुज्ञया दत्तं विधवा वा तदुद्दिशन् ॥*॥
विद्यार्थिने सदा देयं वस्त्रमभ्यङ्गभोजनम् ।
छुरिका उदकं दीपं यस्मात्तेन विना नहि ॥
लेखनीघटनं तीक्ष्णमसिपत्रन्तु लेखनीम् ।
दत्त्वा तु लभते वत्स विद्यादानमनुत्तमम् ॥
पुस्तकास्तरणं दत्त्वा तत्प्रमाणं सुशोभनम् ।
विद्यादानमवाप्नोति सत्यमेतन्तु बुद्धिमान् ॥
पद्मकामासनञ्चैव दत्त्वासनमथापि वा ।
विद्याधारणशीलाय दत्तं भवति राज्यदम् ॥
अञ्जनं नेत्रपादानां दत्तं विद्यापरायणे ।
भूमिं यच्छन्तु क्षेत्रन्तु स्वर्गराज्यफलप्रदाम् ॥
यस्य भूम्यां स्थितो नित्यं विद्यादानं प्रवर्त्तते ।
तस्यापि भवते स्वर्गं तत्प्रभावान्नराधिप ॥
तस्मात् सर्व्वप्रयत्नेन विद्या देया सदा नरैः ।
इह कीर्त्तिमवाप्नोति मृतो याति परां गतिम् ॥”
इति देवीपुराणे विद्यादानमहाभाग्यफला-
ध्यायः ॥ * ॥ अपि च ।
“दशवापीसमा कन्या भूमिदानञ्च तत्समम् ।
भूमिदानाद्दशगुणं विद्यादानं विशिष्यते ॥
यथा सुराणां सर्व्वेषां रामश्च परमेश्वरः ।
तथैव सर्व्वदानानां विद्यादानन्तु देहिनाम् ॥
राजसूयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत् फलं लभते विप्रो विद्यादानेन पुण्यवान् ॥
सर्व्वशस्यसमापूर्णां सर्व्वरत्नोपशोभिताम् ।

विप्राय वेदविदुषे महीं दत्त्वा शशिग्रहे ।
यत्फलं लभते विप्रो विद्यादानेन तत् फलम् ॥
कपिलानां सहस्रेण सम्यग्दत्तेन यत् फलम् ।
तत् फलं समवाप्नोति पुस्तकस्य प्रदानतः ॥
यावच्च पातकं तेन कृतं जन्मशतैरपि ।
तत् सर्व्वं नाशयत्याशु विद्यादानेन भो द्विज ॥
धर्म्मोपदेशं यः कुर्य्यात् शास्त्रं ज्ञात्वा तु वैष्णवे ।
कृत्स्नां धरित्रीं यो दद्यात् उभयोस्तत्समं
फलम् ॥
विद्यादानात् परं दानं न भूतं न भविष्यति ।
येन दत्तेन चाप्नोति शिवं परमकारणम् ॥
विद्या च श्रूयते लोके सर्व्वधर्म्मप्रदायिका ।
तस्माद्विद्या सदा देया पण्डितैर्धार्म्मिकैर्द्विजैः ॥
आत्मविद्याप्रदातारो ये भवन्ति सदा सुने ।
न पुनस्तेऽपि निरयं प्रविशन्ति सुनिश्चयम् ॥
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज ।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात् ॥
शास्त्रदृष्ट्या जगत् सर्व्वं सुस्मृतञ्च शुभाशुभम् ।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके ॥
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्याञ्च यो दद्यात् तस्य संख्या न
विद्यते ॥
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च ।
शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती ॥
यत्किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः ।
तदक्षयञ्च लभते त्वन्नदानाद्विशेषतः ॥
इह लोके बहून् भोगान् भुक्त्वा याति शिवा-
लयम् ॥”
इति पाद्मोत्तरखण्डे ११७ अध्यायः ॥
अथ विद्यारम्भदिनानि ।
विष्णुधर्म्मोत्तरे ।
“संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्द्दने ।
षष्ठीं प्रतिपदञ्चैव वर्ज्जयित्वा तथाष्टमीम् ॥
रिक्तां पञ्चदशीञ्चैव सौरिभौमदिनं तथा ।
एवं सुनिश्चिते काले विद्यारम्भन्तु कारयेत् ॥
पूजयित्वा हरिं लक्ष्मीं देवीञ्चापि सरस्वतीम् ।
स्वविद्यासूत्रकारांश्च स्वाञ्च विद्यां विशेषतः ॥
नमस्ते बहुरूपाय विष्णवे परमात्मने ।
स्वाहेत्यनेन हरिं त्रिः पूजयेत् ।
भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ॥
स्वाहेति ब्रह्मपुराणीयेन च त्रिः पूजयेत् ॥”*॥
लिखनविधिमाह नन्दिपुराणम् ।
“शुभे नक्षत्रदिवसे शुभे वारे दिनस्पृष्टे ।
लेखयेत् पूज्य देवेशान् रुद्रब्रह्मजनार्द्दनान् ॥
पूर्व्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तमः ।
निरोधो हस्तवाक्चौच मनोपथावधारणे ॥”
मत्स्यपुराणञ्च ।
“शीर्षोपेतान् सुसंपूर्णान् समश्रेणीगतान्
समान् ।
अक्षरान् विलिखेद्यस्तु लेखकः स परः
स्मृतः ॥”